# Shankara's LakShmi-Nrisinha Karunarasa or Karavalamba Stotra

# શ્રીલક્ષ્મીનૃસિંહકરુણારસ અથવા કરાવલમ્બસ્તોત્રમ્

## Document Information

Text title : Kaxmi-Nrisinha Karavalamba Karunavalamba Stotra

File name : lxmnrikar.itx

Category : vishhnu, dashAvatAra, stotra, shankarAchArya, vishnu

Location : doc_vishhnu

Author : Adi Shankara

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : Hymn to Lakshmi-Nrisinha

Latest update : April, 26, 2000, May 12, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# શ્રીલક્ષ્મીનૃસિંહકરુણારસ અથવા કરાવલમ્બસ્તોત્રમ્

શ્રીમત્પયોનિધિનિકેતનચક્રપાણે
    ભોગીન્દ્રભોગમણિરાજિતપુણ્યમૂર્તે ।
યોગીશ શાશ્વત શરણ્ય ભવાબ્ધિપોત
    લક્ષ્મીનૃસિંહ મમ દેહિ કરાવલમ્બમ્ ॥ ૧॥

બ્રહ્મેન્દ્રરુદ્રમરુદર્કકિરીટકોટિ-
    સઙ્ઘટ્ટિતાઙ્ઘ્રિકમલામલકાન્તિકાન્ત ।
લક્ષ્મીલસત્કુચસરોરુહરાજહંસ
    લક્ષ્મીનૃસિંહ મમ દેહિ કરાવલમ્બમ્ ॥ ૨॥

સંસારઘોરગહને ચરતો મુરારે
    મારોગ્રભીકરમૃગપ્રચુરાર્દિતસ્ય । var મૃગપ્રવરર્ધિતસ્ય
આર્તસ્ય મત્સરનિદાઘસુદુઃખિતસ્ય var નિધાઘનિપીડતસ્ય
    લક્ષ્મીનૃસિંહ મમ દેહિ કરાવલમ્બમ્ ॥ ૩॥

સંસારકૂપમતિઘોરમગાધમૂલં
    સમ્પ્રાપ્ય દુઃખશતસર્પસમાકુલસ્ય ।
દીનસ્ય દેવ કૃપયા પદમાગતસ્ય var શરણાગતસ્ય
    લક્ષ્મીનૃસિંહ મમ દેહિ કરાવલમ્બમ્ ॥ ૪॥

સંસારસાગરવિશાલકરાલકાલ-
    નક્રગ્રહગ્રસિતનિગ્રહવિગ્રહસ્ય । var ગ્રહગ્રસન
વ્યગ્રસ્ય રાગનિચયોર્મિનિપીડિતસ્ય var રાગલસદૂર્મિનિ
    લક્ષ્મીનૃસિંહ મમ દેહિ કરાવલમ્બમ્ ॥ ૫॥

સંસારવૃક્ષમઘબીજમનન્તકર્મ-
    શાખાયુતં કરણપત્રમનઙ્ગપુષ્પમ્ ।
આરુહ્ય દુઃખફલિતં ચકિતં દયાલો var દુઃખજલધૌ પતતો
    લક્ષ્મીનૃસિંહ મમ દેહિ કરાવલમ્બમ્ ॥ ૬॥

સંસારસર્પવિષદિગ્ધમહોગ્રતીવ્ર- var (ઘનવક્ત્ર)(વિષદષ્ટ)ભયોગ્રતીવ્ર
દંષ્ટ્રાગ્રકોટિપરિદષ્ટવિનષ્ટમૂર્તેઃ । var દંષ્ટ્રાકરાલવિષદગ્ધ
નાગારિવાહન સુધાબ્ધિનિવાસ શૌરે
લક્ષ્મીનૃસિંહ મમ દેહિ કરાવલમ્બમ્ ॥ ૭॥

સંસારદાવદહનાકરભીકરોગ્ર- var દાવદહનાતુરભીકરોરુ-
જ્વાલાવલીભિરતિદગ્ધતનૂરુહસ્ય । var અભિદગ્ધ
ત્વત્પાદપદ્મસરસીરુહમાગતસ્ય var સરસીં શરણાગતસ્ય, રુહમસ્તકસ્ય
લક્ષ્મીનૃસિંહ મમ દેહિ કરાવલમ્બમ્ ॥ ૮॥

સંસારજાલપતિતસ્ય જગન્નિવાસ
સર્વેન્દ્રિયાર્થબડિશાગ્રઝષોપમસ્ય । var બડિશશ્વઝષાત્મનશ્ચ
પ્રોત્કમ્પિતપ્રચુરતાલુકમસ્તકસ્ય var પ્રોત્તમ્ભિત
લક્ષ્મીનૃસિંહ મમ દેહિ કરાવલમ્બમ્ ॥ ૯॥

સંસારભીકરકરીન્દ્રકરાભિઘાત-
નિષ્પીડ્યમાનવપુષઃ સકલાર્તિનાશ । var કલાર્ધિતસ્ય
પ્રાણપ્રયાણભવભીતિસમાકુલસ્ય
લક્ષ્મીનૃસિંહ મમ દેહિ કરાવલમ્બમ્ ॥ ૧૦॥

અન્ધસ્ય મે હૃતવિવેકમહાધનસ્ય
ચોરૈર્મહાબલિભિરિન્દ્રિયનામધેયૈઃ ।
મોહાન્ધકારકુહરે વિનિપાતિતસ્ય
લક્ષ્મીનૃસિંહ મમ દેહિ કરાવલમ્બમ્ ॥ ૧૧॥

લક્ષ્મીપતે કમલનાભ સુરેશ વિષ્ણો
વૈકુણ્ઠ કૃષ્ણ મધુસૂદન પુષ્કરાક્ષ ।
(પાઠભેદ- યજ્ઞેશ યજ્ઞ મધુસૂદન વિશ્વરૂપ ।)
બ્રહ્મણ્ય કેશવ જનાર્દન વાસુદેવ
દેવેશ દેહિ કૃપણસ્ય કરાવલમ્બમ્ ॥ ૧૨॥

યન્માયયાર્જિતવપુઃપ્રચુરપ્રવાહ-
મગ્નાર્થમત્ર નિવહોરુકરાવલમ્બમ્ ।
લક્ષ્મીનૃસિંહચરણાબ્જમધુવ્રતેન
સ્તોત્રં કૃતં સુખકરં ભુવિ શઙ્કરેણ ॥ ૧૩॥

There are variations of verses and sequence in different texts.
The additional verses are given below.

સંસારસાગરનિમજ્જનમુહ્યમાનં
    દીનં વિલોકય વિભો કરુણાનિધે મામ્ ।
પ્રહ્લાદખેદપરિહારપરાવતાર
    લક્ષ્મીનૃસિંહ મમ દેહિ કરાવલમ્બમ્ ॥ ૧૪॥

બદ્ધ્વા ગલે યમભટા બહુ તર્જયન્તઃ
 var ભદ્રાકશૈર્યનુભટાબહુભર્તૃયન્તિ
    કર્ષન્તિ યત્ર ભવપાશશતૈર્યુતં મામ્ ।
 var કર્ષન્તિ યત્ર પથિ પાશશતૈર્યથા મામ્
એકાકિનં પરવશં ચકિતં દયાલો
    લક્ષ્મીનૃસિંહ મમ દેહિ કરાવલમ્બમ્ ॥ ૧૫॥

એકેન ચક્રમપરેણ કરેણ શઙ્ખ-
    મન્યેન સિન્ધુતનયામવલમ્બ્ય તિષ્ઠન્ ।
વામેતરેણ વરદાભયપદ્મચિહ્નં var વરદાભયહસ્તમુદ્રાં
    લક્ષ્મીનૃસિંહ મમ દેહિ કરાવલમ્બમ્ ॥ ૧૬॥

પ્રહ્લાદનારદપરાશરપુણ્ડરીક-
    વ્યાસાદિભાગવતપુઙ્ગવહૃન્નિવાસ ।
 var વ્યાસામ્બરીષ શુકશૌનક હૃન્નિવાસ
ભક્તાનુરુક્તપરિપાલનપારિજાત
    લક્ષ્મીનૃસિંહ મમ દેહિ કરાવલમ્બમ્ ॥ ૧૭॥

સંસારયૂથ ગજસંહતિસિંહદંષ્ટ્રા
    ભીતસ્ય દુષ્ટમૈદૈત્ય ભયઙ્કરેણ ।
પ્રાણપ્રયાણ ભવભીતિ નિવારણેન
    લક્ષ્મીનૃસિંહ મમ દેહિ કરાવલમ્બમ્ ॥ ૧૮॥

લક્ષ્મીનૃસિંહચરણાબ્જમધુવ્રતેન
    સ્તોત્રં કૃતં શુભકરં ભુવિ શઙ્કરેણ ।
યે તત્પઠન્તિ મનુજા હરિભક્તિયુક્તા-
    સ્તે યાન્તિ તત્પદસરોજમખણ્ડરૂપમ્ ॥ ૧૯॥

આદ્યન્તશૂન્યમજમવ્યયમપ્રમેય-

માદિત્યરુદ્રનિગમાદિનુતપ્રભાવમ્ ।
ત્વામ્ભોધિજાસ્ય મધુલોલુપમત્તભૃઙ્ગીં
લક્ષ્મીનૃસિંહ મમ દેહિ કરાવલમ્બમ્ ॥ ૨૦॥

વારાહ-રામ-નરસિંહ-રમાદિકાન્તા
ક્રીડાવિલોલવિધિશૂલિસૂરપ્રવન્ધ! ।
હંસાત્મકં પરમહંસ વિહારલીલં
લક્ષ્મીનૃસિંહ મમ દેહિ કરાવલમ્બમ્ ॥ ૨૧॥

સ્વામી નૃસિંહઃ સકલં નૃસિંહઃ
માતા નૃસિંહશ્ચ પિતા નૃસિંહઃ ।
ભ્રાતા નૃસિંહશ્ચ સખા નૃસિંહઃ
લક્ષ્મીનૃસિંહ મમ દેહિ કરાવલમ્બમ્ ॥ ૨૨॥

પ્રહ્લાદમાનસસરોજવાસભૃઙ્ગ!
ગઙ્ગાતરઙ્ગધવળાઙ્ગ રમાસ્થિતાઙ્ગ! ।
શૃઙ્ગાર સુન્દરકિરીટલસદ્વરાઙ્ગ
લક્ષ્મીનૃસિંહ મમ દેહિ કરાવલમ્બમ્ ॥ ૨૩॥

શ્રી શઙ્કરાર્ય રચિતં સતતં મનુષ્યઃ
સ્તોત્રં પઠેદિહ તુ સર્વગુણપ્રપન્નમ્ ।
સદ્યોવિમુક્તકલુષો મુનિવર્યગણ્યો
લક્ષ્મીનૃસિંહ મમ દેહિ કરાવલમ્બમ્ ॥ ૨૪॥

શ્રીમન્ નૃસિંહ વિભવે ગરુડધ્વજાય
તાપત્રયોપશમનાય ભવૌષધાય ।
તૃષ્ણાદિવૃશ્ચિક-જલાગ્નિ-ભુજઙ્ગ-રોગ
ક્લેશવ્યયામ હરયે ગુરવે નમસ્તે ॥ ૨૫॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસ્ય
શ્રીગોવિન્દભગવત્પૂજ્યપાદશિષ્યસ્ય
શ્રીમચ્છઙ્કરભગવતઃ કૃતૌ
લક્ષ્મીનૃસિંહકરુણારસસ્તોત્રં અથવા
લક્ષ્મીનૃસિંહકરાવલમ્બસ્તોત્રં સમ્પૂર્ણમ્ ॥

The 25 verses are referred in stotra presented in Appendix 1 of

shodhagangA thesis A Study of Narasimha Cult in Sanskrit Literature
at http://shodhganga.inflibnet.ac.in/handle/10603/109961
The verse numbers are extended from the earlier edition linked
in the information file.

Encoded and proofread by Sunder Hattangadi

---

*Shankara's LakShmi-Nrisinha Karunarasa or Karavalamba Stotra*
pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*